योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ००५

पञ्चमः सर्गः ५

श्रीराम उवाच ।

भगवन्मुनिशार्दूल किमिवेह मनोभ्रमे ।

विद्यते कथमुत्पन्नं मनो मायामयं कुतः ।। १

उत्पत्तिमादाविति मे समासेन वद प्रभो ।

प्रवक्ष्यसि ततः शिष्टं वक्तव्यं वदतां वर ।। २

श्रीवसिष्ठ उवाच ।

महाप्रलयसंपत्तावसतां समुपागते ।

अशेषदृश्यसर्गादौ शान्तमेवावशिष्यते ।। ३

आस्तेऽनस्तमितो भास्वानजो देवो निरामयः ।

सर्वदा सर्वकृत्सर्वः परमात्मा महेश्वरः ।। ४

यतो वाचो निवर्तन्ते यो मुक्तैरवगम्यते ।

यस्य चात्मादिकाः संज्ञाः कल्पिता न स्वभावजाः ।। ५

यः पुमान्सांख्यदृष्टीनां ब्रह्म वेदान्तवादिनाम् ।

विज्ञानमात्रं विज्ञानविदामेकान्तनिर्मलम् ।। ६

यः शून्यवादिनां शून्यो भासको योऽर्कतेजसाम् ।

वक्ता मन्ता ऋतं भोक्ता द्रष्टा कर्ता सदैव सः ।। ७

सन्नप्यसद्यो जगति यो देहस्थोऽपि दूरगः ।

चित्प्रकाशो ह्ययं यस्मादालोक इव भास्वतः ।। ८

यस्माद्विष्ण्वादयो देवाः सूर्यादिव मरीचयः ।

यस्माज्जगन्त्यनन्तानि बुद्बुदा जलधेरिव ।। ९

यं यान्ति दृश्यवृन्दानि पयांसीव महार्णवम् ।

य आत्मानं पदार्थं च प्रकाशयति दीपवत् ।। १०

य आकाशे शरीरे च दृषत्स्वप्सु लतासु च ।

पांसुष्वद्रिषु वातेषु पातालेषु च संस्थितः ।। ११

यः प्लावयति संरब्धं पुर्यष्टकमितस्ततः ।

येन मूकीकृता मूढाः शिला ध्यानमिवास्थिताः ।।१२

व्योम येन कृतं शून्यं शैला येन घनीकृताः ।

आपो द्रुताः कृता येन दीपो यस्य वशो रविः ।। १३

प्रसरन्ति यतश्चित्राः संसारासारवृष्टयः ।

अक्षयामृतसंपूर्णादम्भोदादिव वृष्टयः ।। १४

आविर्भावतिरोभावमयास्त्रिभुवनोर्मयः ।

स्फुरन्त्यतितते यस्मिन्मराविव मरीचयः ।। १५

नाशरूपो विनाशात्मा योऽन्तःस्थः सर्वजन्तुषु ।

गुप्तो योऽप्यतिरिक्तोऽपि सर्वभावेषु संस्थितः ।। १६

प्रकृतिव्रततिर्व्योम्नि जाता ब्रह्माण्डसत्फला ।

चित्तमूलेन्द्रियदला येन नृत्यति वायुना ।। १७

यश्चिन्मणिः प्रकचति प्रतिदेहसमुद्गके ।

यस्मिन्निन्दौ स्फुरन्त्येता जगज्जालमरीचयः ।। १८

प्रशान्ते चिद्धने यस्मिस्फुरन्त्यमृतवर्षिणि ।

धाराजलानि भूतानि सृष्टयस्तडितः स्फुटाः ।। १९

चमत्कुर्वन्ति वस्तूनि यदालोकतया मिथः ।

असज्जातमसद्येन येन सत्सत्त्वमागतम् ।। २०

चलतीदमनिच्छस्य कायो यो यस्य संनिधौ ।

जडं परमरक्तस्य शान्तमात्मनि तिष्ठतः ।। २१

नियतिर्देशकालौ च चलनं स्पन्दनं क्रिया ।

इति येन गताः सत्तां सर्वसत्तातिगामिना ।। २२

शुद्धसंविन्मयत्वाद्यः खं भवेद्व्योमचिन्तया ।

पदार्थचिन्तयार्थत्वमिव तिष्ठत्यधिष्ठितः ।। २३

कुर्वन्नपीह जगतां महतामनन्त-

वृन्दं न किंचन करोति न काश्चनापि ।

स्वात्मन्यनस्तमयसंविदि निर्विकारे

त्यक्तोदयस्थितिमति स्थित एक एव ।। २४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे मूलकारणदेवस्वरूपवर्णनं नाम पञ्चमः सर्गः ।। ५ ।।